२ श्रीराम·
श्रीशिव·

श्रीगणेशाय नमः॥ नूतनजलधर■रुचये गोपवधूटीदुकूलचौराय। तस्मै कृष्णाय नमः संसार
महीरुहस्य बीजाय।१। द्रव्यं गुणास्तथा कर्म सामान्यं सविशेषकम्· समवायस्तथाभावः पदार्थाः सप्त
कीर्तिताः।२। क्षित्यप्तेजोमरुद्व्योमकालदिग्देहिनो मनः। द्रव्याण्यथ गुणा रूपं रसो गंधस्ततः परम् ३
स्पर्शः संख्या परिमितिः पृथक्त्वं च ततः परम्· संयोगश्च विभागश्च परत्वं चापरत्वकम्· ४ बुद्धिः सु
खं दुःखमिच्छा द्वेषो यत्नो गुरुत्व■कम्। द्रवत्वं स्नेहसंस्कारावदृष्टं शब्द एव च ·५। उत्क्षेपणं ततो
ऽपक्षेपणमाकुंचनं तथा· प्रसारणं च गमनं कर्माण्येतानि पंच वै।६। भ्रमणं रेचनं स्पन्दनोर्ध्वज्वल
नमेव च· तिर्यग्गमनमप्यत्र गमनादेव लभ्यते।७। सामान्यं द्विविधं प्रोक्तं परं चापरमेव च· द्रव्यादि
त्रिकवृत्तिस्तु सत्ता परतयोच्यते·८। परभिन्ना तु या जातिः सैवापरतयोच्यते· द्रव्यत्वादिकजातिस्तु
परापरतयोच्यते।९। व्यापकत्वात्पराऽपि स्याद्व्याप्यत्वादपराऽपि च। अन्त्यो नित्यद्रव्यवृत्तिर्विशेषः प
रिकीर्तितः।१०। घटादीनां कपालादौ द्रव्येषु गुणकर्मणोः। तेषु जातेश्च संबंधः समवायः प्रकीर्ति
तः।११। अभावस्तु द्विधा संसर्गान्योन्याभावभेदतः। प्रागभावस्तथा ध्वंसोऽप्यत्यन्ताभाव एव च।१२। ॥

१

श्रीराम.
श्रीशिव.

एवं त्रैविध्यमापन्नः संसर्गाभाव इष्यते। सप्तानामपि साधर्म्यं ज्ञेयत्वादिकमुच्यते ॥१३। द्रव्यादयः पं
च भावाः अनेके समवायिनः। सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निर्गुणः क्रियः ॥१४। सामान्यपरिहीना
स्तु सर्वे जात्यादयो मताः। पारिमाण्डल्यभिन्नानां कारणत्वमुदाहृतम् ॥१५। अन्यथासिद्धिशून्यस्य नियता पू
र्ववर्तिता। कारणत्वं भवेत्तस्य त्रैविध्यं परिकीर्तितम् ॥१६। समवायिकारणत्वं ज्ञेयमथाप्यसमवायिहे
तुत्वम्। एवं न्यायनयज्ञैस्तृतीयमुक्तं निमित्तहेतुत्वम् ॥१७। यत्समवेतं कार्यं भवति ज्ञेयं समवायिजनकं
तत्। तत्रासन्नं जनकं द्वितीयमाभ्यां परं तृतीयं स्यात् ॥१८। येन सह पूर्वभावः कारणमादाय वा यस्य। अ
न्यं प्रति पूर्वभावे ज्ञाते यत्पूर्वभावविज्ञानम् ॥१९। जनकं प्रति पूर्ववर्तितामपरिज्ञाय न यस्य गृह्यते। अति
रिक्तमथापि यद्भवेन्नियतावश्यकपूर्वभाविनः ॥२०। एते पञ्चान्यथासिद्धा दण्डत्वादिकमादिमम्।
घटादौ दण्डरूपादि द्वितीयमपि दर्शितम् ॥२१। तृतीयं तु भवेद्व्योम कुलालजनकोऽपरः। पञ्चमो रास
भादिः स्यादेतेष्वावश्यकस्त्वसौ ॥२२। समवायिकारणत्वं द्रव्यस्यैवेति विज्ञेयम्। गुणकर्ममात्रवृत्ति
ज्ञेयमथाप्यसमवायिहेतुत्वम् ॥२३। अन्यत्र नित्यद्रव्येभ्य आश्रितत्वमिहोच्यते। क्षित्यादीनां नवानां तु द्रव्य

श्रीराम.
श्रीशिव.

क्षितिर्जलं तथा तेजः पवनो मन एव च परापरत्वमूर्तत्वक्रियावेगाश्रया अमी ॥२५॥ कालखात्मदि
शां सर्वगतत्वं परमं महत् क्षित्यादि पंच भूतानि चत्वारि स्पर्शवन्ति हि ॥२६॥ द्रव्यारम्भश्चतुर्षु स्याद
थाकाशशरीरिणाम् अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते ॥२७॥ रूपद्रवत्वप्रत्यक्षयोगिनः
प्रथमास्त्रयः ॥ गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः ॥२८॥ आत्मानो भूतवर्गाश्च विशेषगुण
योगिनः ॥ यदुक्तं यस्य साधर्म्यं वैधर्म्यमितरस्य तत् ॥२९॥ स्पर्शादयोऽष्टौ वेगाख्यसंस्कारो म
रुतो गुणाः ॥ स्पर्शाद्यष्टौ रूपवेगौ द्रवत्वं तेजसो गुणाः ॥३०॥ स्पर्शादयोऽष्टौ वेगश्च द्रवत्वं गुरुत्व
कम् रूपं रसस्तथा स्नेहो वारिण्येते चतुर्दश ॥३१॥ स्नेहहीना गन्धयुताः क्षितावेते चतुर्दश बुद्ध्या
दिषट्कं संख्यादिपंचकं भावना तथा धर्माधर्मौ गुणा एते आत्मनः स्युश्चतुर्दश संख्यादिपंचकं कालदि
शोः शब्दश्च ते च खे ॥३३॥ संख्यादयः पंच बुद्धिरिच्छा यत्नोऽपि चेश्वरे परापरत्वे संख्यादि पंच वेगश्च
मानसे ॥३४॥ तत्र क्षितिर्गन्धहेतुर्नानारूपवती मता षड्विधस्तु रसस्तत्र गन्धस्तु द्विविधो मतः ॥३५॥
स्पर्शस्तस्यास्तु विज्ञेयो ह्यनुष्णाशीतपाकजः ॥ नित्यानित्या च सा द्वेधा नित्या स्यादणुलक्षणा ॥३६॥

श्रीराम
श्रीशिव.

नित्या तु तदन्या स्यात् सैवावयवयोगिनी। सा च त्रिधा भवेद्देह इन्द्रियं विषयस्तथा॥३७॥ योनिजादिर्भवेद्दे-
हमिन्द्रियं घ्राणलक्षणम्। विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः॥३८॥ वर्णः शुक्लो रसस्पर्शौ जले म-
धुरशीतलौ। स्नेहस्तत्र द्रवत्वं तु सांसिद्धिकमुदाहृतम्॥३९॥ नित्यतादि प्रथमवत् किंतु देहमयो-
निजम्। इन्द्रियं रसनं सिंधुर्हिमादिर्विषयो मतः॥४०॥ स्पर्श उष्णस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।
नैमित्तिकं द्रवत्वं तु नित्यतादिकं पूर्ववत्॥४१॥ इन्द्रियं नयनं वह्निः स्वर्णादिर्विषयो मतः। अपाकजो-
ऽनुष्णाशीतः स्पर्शस्तु पवने मतः॥४२॥ तिर्यग्गमनवानेष ज्ञेयः स्पर्शादिलिङ्गकः। पूर्ववन्नित्यताद्यु-
क्तं देहव्यापि त्वगिन्द्रियम्॥४३॥ प्राणादिस्तु महावायुः पर्यन्तो विषयो मतः। आकाशस्य तु विज्ञेयः श-
ब्दो वैशेषिको गुणः॥४४॥ इन्द्रियं तु भवेच्छ्रोत्रमेकः सन्नप्युपाधितः। जन्यानां जनकः का-
लो जगतामाश्रयो मतः॥४५॥ परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः। दूरान्तिकादिधीहेतुरेका
नित्या दिगुच्यते॥४६॥ उपाधिभेदादेकापि प्राच्यादिव्यपदेशभाक्। आत्मेन्द्रियाद्यधिष्ठाता करण-
ं हि सकर्तृकम्॥४७॥ शरीरस्य न चैतन्यं मृतेषु व्यभिचारतः। तथात्वं चेदिन्द्रियाणामुपघाते

भा: प: ५

श्रीराम.
.प. मी:
3

मनोपि न तथा ज्ञानाद्यनध्यक्षं तदा भवेत् । धर्माधर्माश्रयोऽध्यक्षो विशेषगुणयोगतः ॥४९॥ प्रवृत्त्या
द्यनुमेयोऽयं रथगत्येव सारथिः ॥ अहंकारस्याश्रयोऽयं मनोमात्रस्य गोचरः ॥५०॥ विभुर्बुद्ध्यादि
गुणवान् बुद्धिस्तु द्विविधा मता । अनुभूतिः स्मृतिश्च स्यादनुभूतिश्चतुर्विधा ॥५१॥ प्रत्यक्षम
प्यनुमितिस्तथोपमितिशब्दजे । घ्राणजादिप्रभेदेन प्रत्यक्षं षड्विधं मतम् ॥५२॥ घ्राणस्य गोच
रो गन्धो गन्धत्वादिरपि स्मृतः ॥ तथा रसो रसज्ञायास्तथा शब्दोऽपि च श्रुतेः ॥५३॥ उद्भूतरूपं न
यनस्य गोचरो द्रव्याणि तद्वन्ति पृथक्त्वसंख्ये । विभागसंयोगपरापरत्वस्नेहद्रवत्वं परि
माणयुक्तम् । ५४ । क्रियां जातिं योग्यवृत्तिं समवायं च तादृशम् ॥ गृह्णाति चक्षुः संबंधादालोको
द्भूतरूपयोः ॥५५॥ उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः ॥ रूपान्यच्चक्षुषो योग्यं रूपम
त्रापि कारणम् ॥५६॥ द्रव्याध्यक्षे त्वचो योगो मनसा ज्ञानकारणम् । मनोग्राह्यं सुखं दुःखमिच्छा
द्वेषो मतिः कृतिः ॥५७॥ ज्ञानं यन्निर्विकल्पाख्यं तदतीन्द्रियमिष्यते । महत्त्वं षड्विधे हेतुरिन्द्रियं क
रणं मतम् । ५८ । विषयेन्द्रियसंबंधो व्यापारः सोऽपि षड्विधः ॥ द्रव्यग्रहस्तु संयोगात्संयुक्तसमवायतः ॥५९॥

श्रीराम.
श्रीशिव.

द्रव्येषु समवेतानां तथा तत्समवायतः। तत्रापि समवायस्य समवायस्तत ... ॥६०॥ तद्वृत्तीनां
समवेतसमवायेन तु ग्रहः। विशेषणतया तद्वदभावानां ग्रहो भवेत्॥६१॥ यदि स्यादुपलभ्येतेत्येवं य
त्र प्रसज्यते। प्रत्यक्षं समवायस्य विशेषणतया भवेत्॥६२॥ अलौकिकस्तु व्यापारस्त्रिविधः परिकी
र्तितः। सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा॥६३॥ आसत्तिराश्रयाणां तु सामा
न्यज्ञानमिष्यते। तदिन्द्रियजतद्धर्मबोधसामग्र्यपेक्ष्यते॥६४॥ विषयी यस्य तस्यैव व्यापारो ज्ञा
नलक्षणः। योगजो द्विविधः प्रोक्तो युक्त[illegible]युञ्जानभेदतः॥६५॥ युक्तस्य सर्वदा भानं चिन्ता
सहकृतोऽपरः। व्यापारस्तु परामर्शः करणं व्याप्तिधीर्भवेत्॥६६॥ अनुमायां ज्ञायमानं लिङ्गं तु
करणं नहि। अनागता[illegible]दिलिङ्गेन न स्यादनुमितिस्तदा॥६७॥ व्याप्यस्य पक्षवृत्तित्वधीः प
रामर्श उच्यते। व्याप्तिः साध्यवदन्यस्मिन्नसंबन्ध उदाहृतः॥६८॥ अथवा हेतुमन्निष्ठविरहाप्रतियोगिना।
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते॥६९॥ सिषाधयिषया शून्या सिद्धिर्यत्र न तिष्ठति। स पक्षस्तत्र
वृत्तित्वज्ञानादनुमितिर्भवेत्॥७०॥ [illegible] विरुद्धस्त्वाप्यसिद्धः प्रतिबन्धीतिः। [illegible]स्य मावादि[illegible]

[illegible]

श्रीराम.
प.८मी
४

आद्यः साधारणस्तु स्यादसाधारणकोपरः। तथैवानुपसंहारी त्रिधानैकान्तिको भवेत् ७२। यः सपक्षे
विपक्षे च भवेत्साधारणस्तु सः। यस्तूभयस्माद्व्यावृत्तः स त्वसाधारणो मतः ७३। तथैवानुप
संहारी केवलान्वयिपक्षकः। यः साध्यवति नैवास्ति स विरुद्ध उदाहृतः ७४। आश्रयासिद्धिराद्या
स्यात्स्वरूपासिद्धिरप्यथा। व्याप्यत्वासिद्धिरपरा स्यादसिद्धिरतस्त्रिधा ७५। पक्षासिद्धिर्यत्र पक्षो
भवेन्मणिमयो गिरिः। ह्रदो द्रव्यं धूमवत्त्वादत्रासिद्धिरथापरा ७६। व्याप्यत्वासिद्धिरपरा नीलं
धूमादिके भवेत्। विरुद्धयोः परामर्शे हेत्वोः सत्प्रतिपक्षता ७७। साध्यशून्यो यत्र पक्षस्त्व
सौ बाध उदाहृतः। उत्पत्तिकालीनघटे गन्धादिर्यत्र साध्यते ७८। ग्रामीणस्य प्रथमतः पश्यतो
गवयादिकं। सादृश्यधीर्गवादीनां या स्यात्सा करणं मतं ७९। वाक्यार्थस्यातिदेशस्य स्मृ
तिर्व्यापार उच्यते। गवयादिपदानां तु शक्तिधीरुपमाफलं ८०। पदज्ञानं तु करणं द्वारं तत्र
पदार्थधीः। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी ८१। लक्षणा शक्यसंबंधस्तात्प
र्यानुपपत्तितः। आसत्तियोग्यताकांक्षातात्पर्यज्ञानमिष्यते ८३। कारणं संनिधानं तु पदस्या

श्रीराम ।
श्री शिव ।
८

स्थितिस्थापकसंस्कारः क्षितौ केचिच्चतुर्ष्वपि । अतीन्द्रियोऽसौ विज्ञेयः क्वचित्स्पन्देऽपि कारणम् । भाव
नाख्यस्तु संस्कारो जीववृत्तिरतीन्द्रियः । उपेक्षानात्मकस्तस्य निश्चयः कारणं भवेत् । स्मरणे
प्रत्यभिज्ञायामप्यसौ हेतुरुच्यते । धर्माधर्मावदृष्टं स्याद्धर्मः स्वर्गादिसाधनम् । यागादिग
ङ्गास्नानादिव्यापारः स तु कीर्तितः । कर्मनाशाजलस्पर्शादिना नाश्यस्त्वयं मतः । अधर्मो
नरकादीनां हेतुर्निन्दितकर्मजः । प्रायश्चित्तादिनाश्योऽसौ जीववृत्ती इमौ गुणौ । इमौ तु वा
सनाजन्यौ ज्ञानादपि विनश्यतः । शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः । कण्ठसंयोगा
दिजन्या वर्णास्ते कादयो मताः । सर्वः शब्दो नभोवृत्तिः श्रोत्रोत्पन्नस्तु गृह्यते । वीचीतरङ्गन्या
येन तदुत्पत्तिस्तु कीर्तिता । कदम्बगोलकन्यायादुत्पत्तिः कस्यचिन्मते । उत्पन्नः को विन
ष्टः क इति बुद्धेरनित्यता । सोऽयं क इति बुद्धिस्तु साजात्यमवलम्बते । तदेवौषधमित्यादौ
सजातीयेऽपि दर्शनात् ॥ १६ ॥ इति श्रीपञ्चानन [illegible] भट्टाचार्यविरचितो भाषापरि
च्छेदः समाप्तः । [illegible] समाप्तमिदं [illegible]

१५